# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रिद्वितीयवर्षम्(SEM- 4) | प्रश्नपत्रम् – ७ | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | कोड – CE.2.4.4 | समय: - ३:०० त: ६:०० |
| दिनाङ्क: - ०५-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणसिद्धन्तकौमुदी , महाभाष्यञ्च । | |

.................................................................................................................

**प्रथमान्विति:**

**प्रश्न:-१** **कयोश्चिद्** द्वयोः **व्याख्या कार्या ।** १०

(१) रदाभ्यां निष्ठातो न: पूर्वस्य च दः ।

(२) विभाषा भावादिकर्मणो: ।

(३) अन्येभ्योऽपि दृश्यन्ते ।

**प्रश्न:-२** अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥ इति अस्या: कारिकायाः संदर्भसूत्रं प्रदर्श्य व्याख्या कार्या ।

**अथवा**

“क्तोऽधिकरणे च धौव्यगतिप्रत्यवसनार्थेभ्य:” इत्येतत् व्याख्येयम् ।

द्वितीयान्विति:

**प्रश्न:-३** **कयोश्चिद्** द्वयोः **व्याख्या कार्या ।** १०

(१) कद्रुकमण्डल्वोश्छन्दसि ।

(२) भवे छन्दसि ।

(३) रेवतीजगतीहविष्याभ्य: प्रशस्ये ।

**प्रश्न:-४** “तद्वासानामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः” अस्य सूत्रस्य यथाग्रन्थं व्याख्या कार्या । १०

**अथवा**

“वसोः समूहे च” एवं “भावे च” उभयोः सूत्रयोः ग्रन्थानुसारं सोदाहरणं टिप्पणी लेख्या ।

तृतीयान्वितिः

**प्रश्नः-५ कयोः अपि द्वयोः ग्रन्थपङ्क्त्योः व्याख्या कार्या |** १०

(१) सिद्धे शब्दार्थसम्बन्धे |

(२) यथा लौकिकवैदिकेषु |

(३) शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ।

**प्रश्नः६** 'सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः' इत्यस्य वाक्यस्य भाष्यानुसारं स्पष्टीकरणं कुरुत | १०

**अथवा**

'लिङ्गार्था तु प्रत्यापत्तिः' इति भाष्यदिशा स्पष्टीकुरुत |

**प्रश्नः-७ केषामपि दशानामेकैकवाक्यैः उत्तराणि लेख्यानि |** १०

(१) "अञ्चेः पूजायाम् " सूत्रकार्यं लिखत |

(२) वसतिक्षुधोः परयोः क्त्वानिष्ठयोः कः आगमः भवति ?

(३) "क्षुब्धस्वान्तः........" सूत्रपूर्तिं कुरुत |

(४) "दूनः" इत्यस्मिन् रूपे कः धातुः ?

(५) "निष्ठायां सेटि" इति सूत्रस्य उदाहरणं किम् ?

(६) "क्तक्तवतू निष्ठा" अस्य सूत्रस्य किं लक्षणम् ?

(७) "संपृचानुरुधा....... |" सूत्रपूर्तिं लिखत ।

(८) 'उकञ्' प्रत्ययविधायकं सूत्रं लिखत |

(९) 'व्याकरणमहाभाष्यम्' इति शब्दस्य समासविग्रहं लिखत |

(१०) सिद्धान्तकौमुद्यां वैदिकप्रकरणे कति अध्यायाः सन्ति ?

(११) छन्दसि अजस्विषये रात्रिशब्दान्ङीप् प्रत्ययः केन सूत्रेण भवति ?

(१२) "गुग्गुलुः......वक्तव्यम्" इति वार्तिकसूत्रस्य पूर्तिं कुरुत |

(१३) भाष्यानुसारं किमिदं धर्मनियम इति ?

(१४) 'व्याकरणम्' शब्दस्य कः पदार्थः ?

(१५) किं लक्ष्यम् एवं किं लक्षणम् ?